# MODEL QUESTION PAPER
## CLASS – X
## SANSKRIT

| | | | |
|---|---|---|---|
| कुल प्रश्नों की संख्या : **Total No. of Question :** | **18** | पृष्ठों की कुल संख्या : **Total No. of Pages :** | **12** |
| समय : 3 घंटे **Time : 3 Hours** | | पूर्णांका : **Full Marks :** | **100** |
| | | उत्तीर्णांका : **Pass Marks :** | **33** |

### सामान्य निर्देश
### GENERAL INSTRUCTIONS

1. परीक्षार्थी यथासंभव अपने शब्दों में ही उत्तर दें।
2. सभी प्रश्नों के उत्तर लिखने हैं।
3. प्रत्येक प्रश्न के अंक उसके सामने अंकित हैं।
4. प्रश्नों के उत्तर प्रश्नों के साथ दिये गये निर्देश के आलोक में ही लिखें।

**विशेष–निर्देशाः**

(क) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति। (इस प्रश्नपत्र में चार खण्ड हैं)

(ख) सर्वेषां प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां निर्धारिते स्थाने क्रमेण एव लेखनीयानि। (सभी प्रश्नों के उत्तर उत्तर–पुस्तिका में निर्धारित स्थान पर क्रम से ही लिखना है)

(ग) सर्वेषां प्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लेखनीयानि। (सभी प्रश्नों के उत्तर निर्देशानुसार केवल संस्कृत में लिखने होंगे)

### खण्ड – क
### अपठितांश–अवबोधनम्
### (अपठितांश अवबोधन)
### (15 अंकाः)

1. अधोलिखितम् अनुच्छेदद्वयं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशम् उत्तरत –
(नीचे लिखे दोनों अनुच्छेदों को पढ़ कर उस पर आधारित प्रश्नों के उत्तर लिखें)

2.

**(अ) प्रथमः अनुच्छेद :–**

बाल्यकाले विशेषतो बालकस्योपरि संसर्गस्य प्रभावो भवति। बालकः यादृशैः बालकैः सह संगतिः करिष्यति तादृशः एव भविष्यति। अतः बाल्यकाले दुर्जनैः सह संगतिः कदापि न करणीया। दुर्जनानां संसर्गेण बहव्यो हानयो भवन्ति, यथा दुर्जनसंसर्गेण मनुष्योऽसद्वृतो भवति, दुर्विचारयुक्तो भवति, तस्य शरीरं क्षीणं निर्बलं च भवति। अतः स्वयशोवृद्धये, ज्ञानवृद्धये सुखस्य शान्तेश्च प्राप्तये सर्वैरपि सर्वदा सत्संगतिः करणीया, दुर्जनसंगतिश्च हेया।

**प्रश्नाः –**

(I) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – 2 X ½ = 1
(क) बालकस्योपरि विशेषतः संसर्गस्य प्रभावः कदा भवति ?
(ख) यशः कया वर्धते ?

(II) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दें) – 2 X 1 = 2
(क) दुर्जनैः सह संसर्गेण काः काः हानयो भवन्ति ?
(ख) बाल्यकाले कस्य उपरि संसर्गस्य प्रभावो भवति ?

(III) यथानिर्देशम् उत्तरत (निर्देशानुसार उत्तर दें) – 4 X ½ = 2
(क) 'दुर्जनानाम्' इति पदस्य मूलशब्दः कः ?
(ख) 'मानवः' इति पदेन विशेषणस्य निर्माणं कृत्वा लिखत ?
(ग) 'साथ' इत्यर्थस्य कः पर्यायः अत्र प्रयुक्तः ?
(घ) 'सज्जनः' अस्य पदस्य किं विलोमपदं प्रयुक्तम् ?

**(आ) द्वितीयः अनुच्छेद :–**

स्वदेशस्य कृते जनानां हृदये यः आदरः स एव ''देशभक्ति'' **अथवा** ''स्वदेश–प्रेम'' कथ्यते। निजं देशं प्रति मनुष्याणां मनसि आदरः निसर्गतः एव भवति। यस्मिन् देशे अस्माभिः जन्म लब्धं, यस्यांके निरन्तरं क्रीडाः जाताः, यस्य पावकैः जलैश्च पालिताः पुष्टाः च, यस्य वायुः अस्मासु जीवनं संचारयति, न तस्य ऋणेन कदाचिदपि वयं अनृणाः भवितुं शक्नुमः। एतस्मादेव कथितं यत् – 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' 'देशभक्तः देशस्य कृते सर्वस्वं त्यजति, प्राणान्नपि न गणयति। देश–भक्तस्य कृते धनस्य आवश्यकता न भवति। एतदर्थं तु हृदि स्नेहस्य आदरस्य श्रद्धायाश्च भावाः एव पर्याप्ताः भवन्ति। देशभक्तिः मनुष्यमात्रस्य कर्त्तव्यम् अस्ति। यस्य पुरुषस्य जीवनं चिन्तनं कार्यानुष्ठानं च यदि स्वदेशस्य कृते भवति तदा तस्य जीवनं धन्यमस्ति। देशभक्तः स्वदेशं न कदापि परतंत्रं द्रष्टुं शक्नोति प्राणेभ्यः अपि सः तं स्वतंत्रं कर्तुं चेष्टते। सः देशः धन्यः यत्र देशभक्ताः जायन्ते। तस्योत्कर्षं च कुर्वन्ति।

**प्रश्नाः –**

(I) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – 2X 1 = 2
(क) केषां मनसि निजं देशं प्रति आदरः निसर्गतः एव भवति ?
(ख) कः अस्मासु जीवनं सञ्चारयति ?

(II) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दें) – 2 X 2 = 4
(क) कः स्वर्गादपि गरीयसी ?
(ख) कस्य जीवनं धन्यम् अस्ति ?

(III) यथानिर्देशम् उत्तरत (निर्देशानुसार उत्तर दें) – 4 X ½ = 2
(क) 'स्वभावतः' अस्मिन् अर्थे गद्यांशे किं पदं प्रयुक्तम् ?
(ख) 'प्राणान्नपि' अस्मिन् पदे संधिविच्छेदः क्रियताम् ?
(ग) 'अस्मासु' पदे का विभक्तिः प्रयुक्ता ?
(घ) 'कर्तुम्' पदे कः प्रत्ययः प्रयुक्तः ?

(IV) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 2
(इस अनुच्छेद के लिए एक समुचित शीर्षक लिखिए)

## खण्ड – ख
## (रचनात्मकं कार्यम्)
## (रचनात्मक कार्य)
## (20 अंकाः)

2. पत्रलेखनम् –

भवान् रमेशः। स्वमित्रं प्रति लिखतं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयत – 10 X ½ = 5

(आप रमेश हैं। अपने मित्र के प्रति लिखे पत्र को मञ्जूषा में दिये गये पदों से पूरा करें)

**मञ्जूषा**

| |
|---|
| लब्ध्वा, साधुवादान्, अचिरमेव, परीक्षायां, प्रियः, लब्धम्, ज्ञात्वा, स्निग्धमित्रम्,परीक्षायां, सस्नेहं। |

मॉडल टाउन
देवगृह।
तिथि : 01.08.2012

(i) .......................................... प्रमोद !
(ii) ....................................... नमोनमः !

तव परीक्षासफलता – पत्रम् अद्यैव (iii) ................................। तव सफलतां (iv) .............................. मम मनसि महान् सन्तोषः, प्रसन्नता च। यद्यपि त्वम् आकस्मिकज्वरवशात् चिराय कष्टं गतः, तथापि (v) .......... ................ प्रथमां श्रेणीं (vi) .................................................. उत्तीर्णवान् इति सत्यं प्रमोदकरः। त्वं मम च पारिवारिकजनस्य च (vii) ......................................... अर्हसि। तव सफलतापत्रं लब्ध्वा (viii) .......................... .. मिष्टान्नं आनीय तस्य वितरणं गृहे च बहिश्च कृतम्।

मित्र येषु विषयेषु त्वया हीनाः अंकाः प्राप्ताः तेषु उत्तरवर्तिन्यां (ix) ...................................... अधिकान् अंकान् प्राप्तुं सततं सावधानस्तिष्ठ।

पत्रस्यान्ते अहं ते पुनरपि भूयोभूयः वर्धापनं कामये। मातापितृभ्यां सादरं नमोनमः।

तव (x) .......................................
रमेशः।

3. संवाद–लेखनम् –

अधोलिखितं संवादं मञ्जूषायां प्रदत्तपंक्तिसहायता पूरयित्वा पुनः लिखत – 5 X 1 = 5

(निम्नलिखित संवाद को मञ्जूषा में प्रदत्त पंक्तियों की सहायता से पूरा कर पुनः लिखें)

**मञ्जूषा :**

- अहं दिल्लीनगरं विगत–वर्षे अगच्छम्।
- आम् ! अहं तत्र रक्तदुर्गम् अपश्यम्।
- आम्! अहं दिल्लीनगरम् अपश्यम्।
- भारतस्य राजधानी दिल्ली अस्ति।
- अहं दिल्ली नगरे यमुनानदीतटम् अगच्छम्।

ऋचा – सखि! भारतस्य राजधानी का अस्ति ?
जया – (i) ................................................................................................ ?

ऋचा – किं त्वं दिल्लीनगरम् अपश्यः ?
जया – (ii) ................................................................................................ ?

ऋचा – त्वं कदा दिल्लीनगरम् गतवती ?
जया – (iii) ................................................................................................ ?

ऋचा – त्वं तत्र रक्तदुर्गम् अपश्यः ?
जया – (iv) ................................................................................................ ?

ऋचा – त्वं दिल्लीनगरे यमुनानदीतटम् अगच्छः ?
जया – (v) ................................................................................................ ?

4. चित्रवर्णनम् –
मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोदत्तस्य चित्रस्य वर्णनं संस्कृते पञ्चवाक्येषु कुरूत –
5 X 2 = 10
(मञ्जूषा में दिये गये शब्दों की सहायता से नीचे दिये गये चित्र का वर्णन पाँच संस्कृत वाक्यों में करें)

**मञ्जूषा :**

| |
|---|
| दीपावली, सज्जा, दीपाः,विस्फोटकानि, मिष्टान्नम्, बालकाः, यज्ञम ,अवली, शोभितः, पजनम, विद्युद्दीपः  लक्ष्मीगणेशयोः। |




**केवलं प्रज्ञाचक्षुर्भ्यः**
**(केवल नेत्रहीन छात्रों के लिए)**

'जन्तुशाला' इति विषयम् अधिकृत्य मञ्जूषापदसहायतया पञ्चवाक्यात्मकं अनुच्छेदमेकं संस्कृते लिखत –
5 X 2 = 10
('जन्तुशाला' इस विषय को लेकर मञ्जूषा के पदों की सहायता से पाँच वाक्यों का एक अनुच्छेद संस्कृत में लिखें।)

**मञ्जूषा :**

| |
|---|
| जन्तुशालाः, जन्तवः, सिंहाः, वानराः, पञ्जरे, शयनं, भ्रमणं, जनाः, द्रष्टुम्, प्रसन्नाः, खगाः। |

## खण्ड – ग
## अनुप्रयुक्त व्याकरणम् (अनुप्रयुक्त व्याकरण)
## (30 अंकाः)

5. अधोलिखितेषु वाक्येषु रेखांकितपदेषु संधिविच्छेदं संधिं वा विधाय प्रदत्तस्थाने उत्तराणि लिखत – 3 X 1= 3
(निम्नलिखित वाक्यों में रेखांकित पदों में संधि–विच्छेद या संधि करके दिये गये स्थान में उत्तर लिखिए)
(क) **रामः + अपि** मया सह चलतु ।
(ख) त्वं **स्वच्छन्दं** मा भ्रम।
(ग) गङ्गाजलं **पो + इत्रम्** अस्ति।

6. अधोलिखितेषु रेखांकित पदेषु समासं विग्रहं वा कृत्वा प्रदत्तस्थाने उत्तराणि लिखत – 4 X 1= 4
(निम्नलिखित रेखांकित पदों में समास या विग्रह करके प्रदत्त स्थान में उत्तर लिखिए)
(क) त्वं **यथासमयं** विद्यालयं गच्छसि।
(ख) **वृक्षारूढाः** वानराः कूर्दन्ति।
(ग) **रामलक्ष्मणौ** सीतया सह वनं गतौ।
(घ) **न ऋतम्** कदापि न वदेत्।

7. अधोलिखितानि वाक्यानि कोष्ठकेषु प्रदत्तानां प्रकृतिप्रत्ययनाम् उचितशब्दरूपैः कुरूत – 5 X 1= 5
(निम्नलिखित वाक्यों को कोष्ठकों में दिये गये प्रकृतिप्रत्ययों के उचित शब्दरूप से पूरा कीजिए।)
ओदनं पचन्ती माता (i) ................................ (पुत्र + ङीप्) कथितवती किं त्वं जानासि कालस्य (ii)... ........................... (महत् + त्व) ? कालः तु सततं चक्रवत् (iii) ................................. (परिवृत् + शानच्) वर्तते। ये जनाः अस्य अस्थिरताम् अनुभूय स्वकार्याणि यथासमयं कुर्वन्ति, ते एव (iv) ....................... (बुद्धि + मतुप्)। ते जनाः एव (v) ................................. (वन्द् + अनीयर्) भवन्ति।

8. तालिकादत्त पदानि संयोज्य संस्कृते पञ्च सार्थकवाक्यानि रचयत – 5 X 1 = 5
(तालिका में दिये गये पदों को जोड़कर संस्कृत में पाँच सार्थक वाक्यों की रचना करें।)

| | | | | |
|---|---|---|---|---|
| वयम् / वयं | इतस्ततः<br>कदापि<br>सहसा<br>उच्चैः<br>श्वः | कक्षायाम्<br>कार्यम्<br>आपणमार्गे<br>असत्यं<br>क्रीडाक्षेत्रे | न | क्रीडिष्यामः<br>अवदाम<br>वदेम<br>कुर्याम<br>भ्रमामः |

9. अधोलिखितवार्तालापे रिक्तस्थानानि वाच्यानुसारं पूरयित्वा प्रदत्तस्थाने उत्तराणि लिखत – 3 X 1 = 3

(निम्नलिखित वार्तालाप में रिक्त स्थानों को वाच्यानुसार पूरा कर प्रदत्त स्थान में उत्तर लिखें) :

गुरुः – राघव ! गत्वा पश्य किम् उद्याने छात्राः क्रीडन्ति।
राघवः – आम्, आचार्य ! उद्याने (i) .................................. क्रीड्यते।
गुरुः – किं कोऽपि तत्र चित्रमपि रचयति ?
राघवः – आम् आचार्य ! तत्र कैश्चित् चित्रमपि (ii) ................................।
गुरुः – शोभनम्। किं ते तत्र पुष्पाणि तु न त्रोटयन्ति ?
राघवः – नहि, नहि, श्रीमान् (iii) ................................... तत्र पुष्पाणि न त्रोट्यन्ते।

10. अधोलिखितवाक्यषु रिक्तस्थानां पूर्तिः अङ्कानां स्थाने संस्कृतपदेषु समयलेखनपूर्वकं कुरुत। 4 X 1 = 4

(निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति अंकों के स्थान पर संस्कृतपदों में समयलेखन पूर्वक करें)

(क) छात्राः प्रातः 4:30 वादने ................................. उत्तिष्ठन्ति।
(ख) 9:45 वादने .................................. छात्राः विद्यालयं गच्छन्ति।
(ग) 4:15 वादने ................................... छात्राः विद्यालयात् प्रत्यागच्छन्ति।
(घ) रात्रौ 9:00 वादने .......................... स्वपन्ति।

11. अधोलिखित वाक्येषु अङ्कानां स्थाने संख्यावाचक विशेषणपदानि प्रयुज्य उत्तराणि लिखत – 4 X ½ = 2

(निम्नलिखित वाक्यों में अङ्कों के स्थान पर संख्यावाचक विशेषण पदों का प्रयोग कर उत्तर लिखें) :

मम विद्यालये सहस्त्रद्वयं छात्राः पठन्ति। अत्र ........ 1 ............ वर्गे प्रायः .......... 50 ........ छात्राः सन्ति। विद्यालये .... 2 ........... प्रयोगशाले स्तः। अत्र ......... 45 .......... अध्यापकाः परिश्रमेण अध्यापने संलग्लाः सन्ति।

12. अधोलिखितवाक्यानां रेखांकित पदानि संशोध्य पुनः लिखत – 4 X 1 = 4

(निम्नलिखित वाक्यों के रेखांकित पदों को शुद्ध करके पुनः लिखें)

(निम्नलिखित वाक्यों के रेखांकित पदों को शुद्ध करके पुनः लिखें)

(क) रमेशः <u>मया</u> पुस्तकं पठति।
(ख) कक्षायां <u>त्रीणि</u> बालिकाः पठन्ति।
(ग) त्वं पुस्तकं <u>पठामि</u>।
(घ) इमे <u>बालिकौ</u> पठतः।

## खण्ड – घ
## पठित अवबोधनम् (पठित अवबोधन)
## (35 अंकाः)

13. अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा तदाधारितप्रदत्तप्रश्नानाम् उत्तराणि निर्धारिते स्थाने यथानिर्देशम् लिखत –

(निम्नलिखित गद्यांश, पद्यांश और नाट्यांश को पढ़कर उन पर आधारित दिये गये प्रश्नों के उत्तर निर्धारित स्थान में निर्देशानुसार लिखें)

**(अ) गद्यांशः –**

अथ राजानं मुनिरुवाच – ''मन्ये भवदीयस्य प्रश्नत्रयस्य समाधानमस्य जनस्य परिवर्तितमानस्य सेवयैव जातम्। मुनिः पुनरपि विशदीकुर्वन्नकथयत् – अयमेव श्रेष्ठः समयः यत्र मानवः परोपकारे कस्मिन्नपि कर्मणि वा व्यापृतः समक्षं वर्तमानः पुरुष एव श्रेष्ठः कस्यापि सहायतां कामयमानः। सेवैव श्रेष्ठं कर्म येन हृदयपरिवर्तनमपि जायते।'' राजा मुनेरुत्तरप्रदानपद्धत्या प्रमुदितः भूत्वा स्वनगरं गतः।

**प्रश्नाः –**

(I) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – 2X 1 = 2

(क) अथ कः राजानम् उवाच ?

(ख) किं कुर्वन् मुनिः पुनः अकथयत् ?

(II) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) – 1

(क) श्रेष्ठः समयः कः ?

(ख) कः पुरुषः श्रेष्ठः।

(III) यथानिर्देशम् उत्तरत (निर्देशानुसार उत्तर दीजिए) – 4 X ½ = 2

(क) 'त्रयस्य' इति पदे का विभक्ति ?

(ख) 'मुनिरुवाच' इति पदस्य संधिविच्छेदं लिखत।

(ग) 'श्रेष्ठं कर्म' अनयोः पदयोः विशेष्यपदं चिनुत।

(घ) 'परोक्षम्' इत्यस्य विलामपदं चित्वा लिखत।

**(आ) पद्यांशः –**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः।

**प्रश्नाः –**

(I) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – 2X 1 = 2

(क) वायसः कस्य गुणं न वेत्ति ?

(ख) सिंहस्य बलं कः न वेत्ति ?

(II) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर लिखें) – 1

वसन्तस्य गुणं कः जानाति ?

(III) यथानिर्देशम् उत्तरत (निर्देशानुसार उत्तर दें) – 4 X ½ = 2

(क) 'बलं' इति पदे का विभक्ति ?

(ख) 'काकः' इति अर्थस्य कृते पर्यायं चित्वा लिखत।

(ग) 'वेत्ति' इति क्रियापदे कः लकारः प्रयुक्तः ?

(घ) 'गुणी' इत्यस्मिन् पदे प्रयुक्तं प्रत्ययं लिखत।

**(इ) नाटयांशः –**

| | |
|---|---|
| चाणक्यः – | भो श्रेष्ठिन् ! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम् । नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति । चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव । |
| चन्दनदासः – | (सहर्षम्) आर्य ! अनुगृहीतोऽस्मि। |
| चाणक्यः – | भो श्रेष्ठिन् ! स चापरिक्लेशः कथमाविर्भवति इति ननु भवता प्रवष्टव्याः स्मः। |
| चन्दनदासः – | आज्ञापयतु आर्यः। |
| चाणक्यः – | राजनि अविरुद्धवृत्तिर्भव। |
| चन्दनदासः – | आर्य ! कः पुनरधन्यो राज्ञो विरूद्ध इति आर्येणावगम्यते ? |
| चाणक्यः – | भवानेव तावत् प्रथमम्। |
| चन्दनदासः – | (कर्णौ पिधाय) शान्तं पापम्, शान्तं पापम्। कीदृशस्तृणानामग्निना सह विरोधः ? |
| चाणक्यः – | अयमीदृशो विरोधः यत् त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि। |

**प्रश्नाः –**

(I) एकपदेन उत्तरत (एक पद में उत्तर दें) – 2 X 1 = 2

(क) नन्दस्य प्रीतिं कः उत्पादयति ?

(ख) अग्निना सह केषां विरोधः कीदृशः ?

(II) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दें) – 1

(क) चन्द्रगुप्तस्य अपथ्यकारी कः आसीत् ?

(III) यथानिर्देशम् उत्तरत (निर्देशानुसार उत्तर दें) – 4 X ½ = 2

(क) 'भवता' इति पदे का विभक्ति ?

(ख) 'भवानेव तावत् प्रथमम्' इति कः कं प्रति कथयति ?

(ग) 'नन्दस्यैव' इति पदस्य संधिविच्छेदं लिखत।

(घ) 'अनलेन' इति पदस्य प्रयुक्तं पर्यायं चित्वा लिखत।

14. अधोलिखितयोः कथनयोः भावम् उपयुक्तपदैः पूरयत – 3 + 3 = 6
(निम्नलिखित कथनों के भाव उपयुक्त पदों से पूरा करें)

(क) क्रोधो हि शत्रुः प्रथमो नराणां,
देहस्थितो देहविनशनाय।

यथास्थितः काष्ठगतो हि बह्निः
स एवं बह्निर्दहते शरीरम्।।

अस्य भावः अस्ति यत् (i) .................... नाम शत्रुः (ii) .................... शरीरे स्थित्वा वह्निना काष्ठेव तेषां (iii) ............................ नाशयति।

(ख) वयोबलशरीराणि देशकालाशनानि च।
समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात् ।।

अस्य भावः अस्ति यत् आयुः (i) ................................ स्थानं, कालं भोजनानां च सम्यक् (ii) ............................................. कृत्वैव (iii) ................................... करणीयः अन्यथा व्यायामेन रोगाः अपि भवितुं शक्यन्ते।

15. अधोलिखित श्लोकद्वयस्य अन्वयौ पूरयित्वा उत्तराणि लिखत – 1½ + 1½ = 3
(निम्नलिखित दोनों श्लोकों के अन्वय पूरा कर उत्तर लिखिए) :

(क) एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्।।

अन्वयः –
एक एव मानी (i) ....................................... चातकः वने वसति वा (ii) ............................................................ म्रियते पुरन्दरं (iii) ..................................... वा।

(ख) एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना ।।

अन्वयः –
एकेन राजहंस (i) ........................................... या शोभा भवेत् (ii) ............................... तीरवासिना (iii) .................................. सा (शोभा) न (भवति)।

16. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरूत – 4 X 1 = 4
(रेखांकित पदों के आधार पर प्रश्न निर्माण करें) –
(i) भूकम्पविभीषिका विशेषण कच्छजनपदं ध्वंशावशेषेषु परिवर्तितवती।
(ii) विवशाः प्राणिनः आकाशे पिपीलिकाः इव निहन्यन्ते।
(iii) एतादृशी भयावह घटना गढ़वाल क्षेत्रे घटिता।
(iv) तदिदानीं भूकम्पकारणं विचारणीयं तिष्ठति।

17. अधोलिखितवाक्यानि घटनाक्रमानुसारं पुनः लिखत – 8 X ½ = 4
(निम्नलिखित वाक्यों को घटनाक्रम के अनुसार पुनः लिखें)
(i) शिष्यः चन्दनदासं प्रवेशयति।
(ii) चन्दनदासः धनप्रदानेन राज्ञः प्रियं कर्त्तुं तत्परः भवति।
(iii) चाणक्यः पृच्छति – अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः।
(iv) चाणक्यः कथयति – नन्दराज्ये एव अर्थकारणात् सम्बन्धः न चन्द्रगुप्तराज्ये।
(v) चाणक्यः कथयति – राजानः प्रतिप्रियम् इच्छन्ति।
(vi) चन्दनदासः कथयति आर्यस्य प्रसादेन अखण्डिता में वणिज्या।
(vii) तव गृहेरक्षितम् अमात्यराक्षसस्य गृहजनं समर्प्य राजानं प्रसन्नं कुरु।
(viii) चाणक्यः चन्दनदासं द्रष्टुम् इच्छति।

18. अधोलिखितानां शब्दानां विलोमपदैः सह मेलनं कुरुत – 6 X ½ = 3
(निम्नलिखित शब्दों का विलोम पदो के साथ मेल करें) –

| | | |
|---|---|---|
| **शब्दाः** | | **विलोम पदाः** |
| (i) अनादरः | – | गुणः |
| (ii) दोषः | – | असत्यम् |
| (iii) पूर्वम् | – | तत्र |
| (iv)सत्यम् | – | तदानीम् |
| (v) इदानीम् | – | आदरः |
| (vi)अत्र | – | पश्चात्। |